सप्तमः पाठः

# ब्रेललिपिः

QRB1I9

*ब्रेललिपि का आविष्कार लुई ब्रेल ने किया था। फ्रांस देश के कूपरवे शहर में 4 जनवरी, 1809 को उनका जन्म हुआ था। शुरुआती तीन सालों तक लुई देख सकते थे। एक दिन उनके पिता बाहर गए थे। वे घोड़ों पर बैठने की चमड़े की जीन बनाते थे। उनका चमड़े को काटने–छेदने का औजार घर पर था। उसी में एक नुकीला सूजा था। खेल–खेल में लुई उससे चमड़े पर छेद करने की कोशिश कर रहे थे। सूजा फिसला और लुई की एक आँख में जा लगा। फिर चोट का असर दूसरी आँख तक फैल गया। लुई के पिता ने लुई के लिए एक पतली छड़ी बना दी। धीरे–धीरे लुई ने छड़ी की मदद से टटोलकर चलना सीख लिया। वे छूकर, सूँघकर, सुनकर चीजों को पहचान लेते थे। थोड़े दिनों बाद उन्हें पेरिस शहर के नेत्रहीन बच्चों के एक स्कूल में दाखिला मिल गया। शाम को लुई ने संगीत और पियानो बजाना सीखना शुरू किया। उन दिनों नेत्रहीन बच्चों के लिए किताब बनाने के कई प्रयास हो रहे थे। कागज की पट्टी पर छेद करके एक अनोखी लिपि खोजी गई। कागज को पलटकर उभरी हुई बिंदियों को छूकर पढ़ा जा सकता था। उसको बेहतर बनाने के काम में लुई जुट गए। लुई ने फ्रेंच भाषा की रोमन लिपि के सभी 26 अक्षरों के उभरी हुई 6 बिंदियोंवाले नमूने बना डाले। उन बिंदियों को छूकर पढ़ना–लिखना संभव था। यही लिपि ब्रेललिपि नाम से प्रसिद्ध हुई। 6 जनवरी, 1852 को लुई ब्रेल का देहांत हुआ, लेकिन आज तक ब्रेललिपि काम में आती है। ब्रेललिपि में किताबें छपती हैं। कम्प्यूटर आने के बाद से उस पर पढ़ना–लिखना और अधिक आसान हो गया है। प्रस्तुत पाठ में आए नीलेश जैसे बच्चों की विशेष आवश्यकता है। वह देख नहीं सकता है। उसको पढ़ने–लिखने के लिए खास उपकरणों की जरूरत होती है। यह उसका अधिकार है। इस पाठ में नीलेश और उसके मित्र धनुष का संवाद है।*

धनुषः – नमस्कारः! अत्र भवतः स्वागतम्।

नीलेशः – नमस्कारः।

धनुषः – आगच्छतु। उपविशतु। भवतः परिचयः कः ?

नीलेश : – मम नाम नीलेशः अस्ति। अहं नवम्यां कक्षायां पठितुमागच्छामि। मम मातुः स्थानान्तरणम् अस्मिन् नगरे अभवत्। भवतः परिचयः कः ?

धनुषः – मम नाम धनुषः। अहमपि नवम्यां कक्षायां पठामि, किन्तु महदाश्चर्यं भवान् कथं पठति!

नीलेशः – अहं ब्रेललिपिमाध्यमेन पठनं लेखनं च करोमि। इयं विशिष्टा लिपिः अस्ति।


धनुषः – अतीव शोभनमस्ति।

नीलेशः – मित्र!मम पूर्वविद्यालये मम कृते सर्वाणि साधनानि सुलभानि आसन्।

धनुषः – कानि कानि साधनानि ?

नीलेशः – विद्यालयं परितः दृष्टिबाधितमित्राणां कृते विशेषः मार्गः निर्मितः।

| | | |
|---|---|---|
| धनुषः | – | अयं मार्गः कथं लाभप्रदः ? |
| नीलेशः | – | मित्र! अहं स्वकीयेन दण्डसाहाय्येन संस्पृश्य सर्वत्र गमनागमनं करोमि। |



| | | |
|---|---|---|
| धनुषः | – | मित्र! स्वकीयां कक्षां भवान् कथं जानाति ? |
| नीलेशः | – | द्वारमध्ये ब्रेललिप्या कक्षायाः संख्या लिखिता। |
| धनुषः | – | तेन किं भवति ? |
| नीलेशः | – | तां स्पर्शं कृत्वा जानाम्यहम्। |
| धनुषः | – | किं भवतः पुस्तकानि अपि ब्रेललिप्याम् उपलब्धानि सन्ति ? |
| नीलेशः | – | आम्। विद्यालये एकः सङ्गणकः अपि मम मित्रम् आसीत्। |
| धनुषः | – | तेन किम् भवति ? |
| नीलेशः | – | सङ्.गणके एका विशिष्टा सुविधा वर्तते। मम वचनं श्रुत्वा सङ्गणकः लिखितुं शक्नोति। |

धनुषः – भवतः वृत्तान्तं श्रुत्वा दृष्ट्वा च अहमपि स्फूर्तिम् अनुभवामि। एतादृशानि साधनानि सर्वेभ्यः दृष्टिबाधितेभ्यः सुलभानि भवेयुः।

नीलेशः – आम्! धनुष !

धनुषः – अस्माकं विद्यालये विविधोपकरणानि न सन्ति।

नीलेशः – ततः किं कर्त्तव्यम् ?

धनुषः – वयं सर्वे छात्राः आवेदनं कुर्याम यत् अस्माकं विद्यालये समुचिता व्यवस्था भवेत्। तदैव अस्माकं मित्राणां विशेषावश्यकतायाः पूर्तिः भविष्यति।

नीलेशः – उत्तमः विचारः भवतः।

## अभ्यासः

**1. रिक्तस्थानानि पूरयत –**

(क) मम ...................... स्थानान्तरणम् अस्मिन् नगरे अभवत्।

(ख) विद्यालयं ....................... विशेषः मार्गः निर्मितः।

(ग) द्वारमध्ये .................. कक्षायाः संख्या लिखिता।

(घ) ....................... अपि मम मित्रम् ।

(ङ.) विद्यालये समुचिता ....................... भवेत्।

**2. संस्कृतभाषया उत्तरत –**

(क) नीलेशः केन माध्यमेन पठति ?

(ख) सङ्गणकः किं कर्तुं शक्नोति ?

(ग) धनुषः कथं मित्रस्य सहायतां करोति ?

(घ) किं तव विद्यालये नीलेशस्य शिक्षार्थं व्यवस्था अस्ति ?

(ङ.) ततः किं कर्त्तव्यम् ?

**3. स्तम्भमेलनं कुरुत –**

| 'अ' | | 'ब' |
|---|---|---|
| पठितुम् | – | क्त |
| स्पृष्ट्वा | – | तुमुन् |
| पठनम् | – | क्त्वा |
| कृतवान् | – | ल्युट् |
| गतः | – | क्तवतु |

**4. पाठात् चित्वा उपसर्गयुक्तपदानि लिखत –**

यथा – आगच्छतु .........................................

......................................... .........................................

......................................... .........................................

**5. अधोलिखितानां शब्दानां विलोमपदं लिखत –**

(क) शोभनम् – ........................

(ख) उपलब्धानि – ........................

(ग) मित्रम् – ........................

(घ) सुलभानि – ........................

(ङ.) स्फूर्तिम् – ........................

QRJHJH

**6. अधोलिखितानां प्रश्नानाम् उत्तराणि मातृभाषया लिखत –**

(क) ब्रेललिपिः कीदृशी भवति ?

(ख) तव दृष्टिबाधितं मित्रम् अस्ति ?

(ग) ब्रेललिप्याम् पुस्तकानि कुत्र उपलब्धानि भवन्ति ?

(घ) त्वं सङ्गणकं जानासि ?

(ङ.) विद्यालये कीदृशी व्यवस्था भवेत् ?